
तस्मै रोकश्च शोकश्च माकरी इत्यु सप्तमी ॥"
इत्यष्टार्थे न्यायादिति शेषः । रोकं छिद्रम् ।
तिथितत्त्वस्य पौर्णमास्यन्तमासाङ्कत्वान्माक-
रीति पदं मकराकारस्थचान्द्रमासीयतिथिपरम् ।
"तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दि-
शेत् ॥"
इति ब्रह्मपुराणात् ॥
मन्वन्तरादित्वेन तथा युक्तत्वाच्च । यथा,मत्स्य-
पुराणे ;
"यस्मान्मन्वन्तरादौ तु रथमापुर्दिवाकराः ।
माघमासस्य सप्तम्यां तस्मात् सा रथसप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥"
अतएव नारसिंहे रथाख्यायामित्युक्तम् । यथा,
"महानवम्यां द्वादश्यां भरण्यामपि चैव हि ।
तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ।
माघमासे तु सप्तम्यां रथाख्यायान्तु वर्जयेत् ॥"
द्वादश्यां शयनोत्थानद्वादश्याम् । भरण्यां शक्र-
ध्वजपातभरण्याम् । इति कल्पतरुः । अत्र
महानवम्यादिसाहचर्य्यात् गौणचान्द्रत्वं प्रती-
यते । अतएव चतुर्दशमन्वन्तरादिगणने क्वापि
न रात्र्युल्लेखः । यथा, भविष्यमात्स्ययोः ।
"अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढ़स्यापि दशमी तथा माघस्य सप्तमी ॥
श्रावणस्याष्टमी कृष्णा तथाषाढ़स्य पूर्णिमा ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी
सिता ।
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ॥"
अत्रामावास्याष्टमीव्यतिरिक्ताः शुक्लाः । पुनः
पुनस्तथापदोपादानात् उपक्रमोपसंहारयोः
शुक्लत्वकीर्त्तनाच्च । अत्र कामधेनौ तृतीया
चैव माघस्येति । कल्पतरौ तु तृतीया चैत्र-
मासस्येति लिखितम् । अत्र पाठद्वैधे श्रीपति-
रत्नमालायाम् । अश्वयुजि शुक्लनवमी द्वाद-
श्यूर्ज्जे मधौ तृतीया चेति पाठाच्चैत्रतृतीयैव
ग्राह्या । श्रीदत्तोऽप्येवम् । माघसप्तम्याश्चान्द्रत्वं
सौरागमेऽपि ।
"अर्कपत्रैः सबदरैर्दूर्व्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥
माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी ।
माकरीति च यत् प्रोक्तं तत् प्रायोवृत्तिदर्श-
नात् ॥"
अष्टाङ्गविधिना ।
"योऽष्टाङ्गमर्घ्यमापूर्य्य भानोर्मूर्द्ध्नि निवेदयेत् ।
ताम्रपात्रार्घ्यदानेन पुण्यं दशगुणं स्मृतम् ॥"
इति विष्णुपुराणीयेन । आदित्यपुराणे ।
"उत्तरायणविशेषेण यत् कर्म्म विहितं नरैः ।
दैवं वाप्यथवा पैत्रं तदन्यत्रापि दृश्यते ॥"
अर्घमन्त्रस्तु ।
"जननी सर्व्वभूतानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि नमस्ते रविमण्डले ॥"
प्रणाममन्त्रस्तु ।
"सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तम्यां हि नमस्तुभ्यं नमोऽनन्ताय वेधसे ॥"
सप्तिरश्वः । इति तिथ्यादितत्त्वम् ॥*॥ सप्तमी-
व्रतविशेषो यथा,—
ब्रह्मोवाच ।
"भगवन् भवसंसारसागरोत्तारकारकम् ।
किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥
श्रीभगवान् उवाच ।
सौरधर्म्मं प्रवक्ष्यामि नाम्ना कल्याणसप्तमीम् ।
विशोकसप्तमीं तद्वत् फलदां पापनाशिनीम् ॥
शर्करासप्तमीं पुण्यां तथा कमलसप्तमीम् ।
मन्दारसप्तमीं पुण्यां तद्वत् शुभसप्तमीम् ॥
सर्व्वाः सर्व्वफलाः प्रोक्ताः सर्व्वदेवर्षिपूजिताः ।
विधानमासां वक्ष्यामि यथावदनुपूर्व्वशः ॥
यदा तु शुक्लसप्तम्यामादित्यस्य दिनं भवेत् ।
सा तु कल्याणिनी नाम विजया तु निगद्यते ॥"
आसां इतिकर्त्तव्यताकालौ च मत्स्यपुराणे
६९ अध्यायावधि ७५ अध्यायपर्य्यन्तं द्रष्टव्यौ ॥*॥
सा सूर्य्यमूर्त्तिप्रकाशिका तिथिः । यथा,—
"एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत् ।
प्रकाशत्वं जगामाशु देवतानां महाप्रभः ॥
एतत् सर्व्वं सुराणान्तु दुःखनं शमितं पुरा ।
सप्तम्यां खलु सूर्य्येण मूर्त्तिश्च कृतवान् भुवि ॥"
इति वाराहे सूर्य्योत्पत्तिनामाध्यायः ॥
सप्तरक्ता, स्त्री, (सप्तानां रक्तानां तद्वर्णानां समा-
हारः । ) शरीरस्य रक्तवर्णसप्तावयवाः । ते च
हस्तपादतलनेत्रान्तरतालुकाधरजिह्वानखाः ।
यथा, सामुद्रके ।
"पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकाधरजिह्वाश्च सप्तरक्ता प्रशस्यते ॥"
सप्तर्षयः,पुं,भूम्नि, (सप्त ऋषयः ।) सप्तसंख्यकर्षयः ।
तेषां नामानि यथा । मरीचिः १ अत्रिः २
अङ्गिराः ३पुलस्त्यः ४पुलहः५क्रतुः६वशिष्ठः७ ।
इत्यमरः ॥ अपि च ।
"सप्तर्षिमण्डलं तस्माद्दृश्यते सर्व्वतोपरि ।
तत्र सप्तर्षयः सन्ति विनिर्मुक्ताः प्रजासृजा ॥
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः ।
वशिष्ठश्च महाभाग ब्रह्मणो मानसाः सुताः ॥
सप्तब्रह्माण इत्येते उच्यन्ते ब्रह्मवादिभिः ।
संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ॥
अरुन्धतिस्तथा लज्जा तत्पत्न्यो लोकमातरः ।
एतासां तपसा चैतद्धार्य्यते भुवनत्रयम् ॥
सन्ध्यात्रयमुपासीना गायत्रीजपतत्पराः ।
तस्मिन्लोके वसन्त्येते ब्राह्मणा ब्रह्मवादिनः ॥"
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥
(प्रतिमन्वन्तरे सप्तर्षयो भिन्ना एवासन् । तद्-
वृत्तान्तास्तु ऋषिशब्दे द्रष्टव्यः ॥ )
सप्तला,स्त्री, (सप्त लातीति । ला+कः ।)नव-
मालिका । इत्यमरः ॥ चर्म्मकषा । गुञ्जा ।
पाटला । इति मेदिनी ॥
सप्तशती, स्त्री, सप्तानां शतानां समाहारः । इति
व्याकरणम् ॥ ("द्विगोः ।" ४ । १ । २१ । इति
ङीप् ।) सप्तशतिका । सप्तशतश्लोकात्मकदेवी-
माहात्म्यम् । चण्डीति ख्यातम् । यथा,—
"अर्गलं कीलकञ्चादौ पठित्वा कवचं ततः ।
जपेत् सप्तशतीं चण्डीं क्रम एव शिवोदितः ॥"
इत्यर्गलस्तोत्रम् ॥
तथा च नागोजीभट्टः ।
"तत्राद्ये चरिताध्याये श्लोका अशीतिरुत्तमाः
अथ मध्ये चरित्रे तु पञ्चाष्टैकसुसंख्यकाः ॥
त्रयोऽध्यायास्ततः सप्तचतुर्व्वेदखवेदकाः ।
अथोत्तरचरित्रे तु षट्षड्वन्हित्रिलोकभाक् ।
अग्नीसोमाध्यायवती गीता सप्तशती स्मृता ॥"
सप्तशलाकाः, पुं, (सप्त शलाकाः तद्वत्रेखा यत्र ।)
विवाहस्य शुभाशुभदिनज्ञानार्थं तिर्य्यगूर्द्ध्वसप्त-
रेखाविशिष्टचक्रविशेषः । यथा,—
"कृत्तिकादिचतुःसप्तरेखाराशौ परिभ्रमन् ।
ग्रहश्चैकरेखास्थो वेधः सप्तशलाकजः ॥
सप्त सप्त विलिखेत् प्ररेखिका-
स्तिर्य्यगूर्द्ध्वमथ कृत्तिकादिकान् ।
लेखयेदभिजिता समन्वितं
चैकरेखगखगेन विध्यते ॥
वैश्वस्य चतुर्थांशे श्रवणादौ लिप्तिकाचतुष्के च
अभिजित् तस्य खचरे विज्ञेया रोहिणीविद्धा ॥"
लिप्तिका दण्डः ।
"यस्याः शशी सप्तशलाकभिन्नः
पापैरपापैरथवा विवाहे ।
रक्ताम्बरेणैव तु रोदमाना
श्मशानभूमिं प्रमदा प्रयाति ॥"
इति सप्तशलाकावेधः । इति ज्योतिस्तत्त्वम् ॥

तच्चक्ररूपं यथा ।




सप्तशिरा, स्त्री, (सप्त शिरा यस्याः ।) नागवल्ली ।
इति राजनिर्घण्टः ॥
सप्तसप्तिः, पुं, ( सप्त सप्तयो घोटका यस्य । )
सूर्य्यः । इति हेमचन्द्रः ॥ (यथा, रघुः ।१३।४१।
"हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥")